# Brahmaproktam Kashi Vishveshvara Shivapujopadesham

# બ્રહ્માપ્રોક્તં કાશી વિશ્વેશ્વર શિવપૂજોપદેશમ્

## Document Information

Text title : Brahmaproktam Kashi Vishveshvara Shivapujopadesham

File name : kAshIvishveshvarashivapUjopadeshambrahmAproktaM.itx

Category : shiva, shivarahasya, upadesha, advice, tIrthakShetra, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 15 | 178-219||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# બ્રહ્માપ્રોક્તં કાશી વિશ્વેશ્વર શિવપૂજોપદેશમ્

યત્ર કાશ્યાં મહાદેવો જન્તુમાત્રસ્ય સાદરમ્ ।
દેહાન્તે પરમં મન્ત્રં શૈવં દાતુમિહોદ્યતઃ ॥ ૧૭૮॥

તત્ર કાશ્યાં મહાદેવો લીલારૂપધરઃ શિવઃ ।
ઉમયા સહિતઃ પ્રીત્યા વિચરત્યમ્બિકાપતિઃ ॥ ૧૭૯॥

યત્ર કાશ્યાં મહાદેવઃ સ્વભક્તેભ્યો યથાયથમ્ ।
દદાતિ નિત્યં સર્વાર્થાન્સા કશી શ્રુતિસમ્મતા ॥ ૧૮૦॥

પશ્યન્તુ પુણ્યપુરુષં શિવપૂજાપરાયણમ્ ।
એવમેતસ્ય સતતં પૂજનં ક્રિયતે મયા ॥ ૧૮૧॥

અયં ધન્યતમો મર્ત્યઃ કાશીં પ્રાપ્ય મહેશ્વરમ્ ।
પૂજયિત્વા સ્થિતઃ પ્રીત્યા બિલ્વપત્રાદિસાધનૈઃ ॥ ૧૮૨॥

ચૈત્રશુક્લાષ્ટમીં પ્રાપ્ય સોઽઙ્ગમુદ્ધૂલ્ય ભસ્મના ।
કૃત્વા વિશ્વેશ્વરસ્યાર્ચાં જજાપાયં ષડક્ષરમ્ ॥ ૧૮૩॥

અન્નપૂર્ણાં તતઃ સમ્યક્ સમ્પૂજ્ય તદનન્તરમ્ ।
અષ્ટોત્તરશતં ચક્રે મૌનેનાયં પ્રદક્ષિણામ્ ॥ ૧૮૪॥

નમસ્કારાંસ્તતશ્ચક્રે શતમષ્ટોત્તરં મુદા ।
પુનઃ સમર્ચયામાસ દેવીં ત્રિભુવનેશ્વરીમ્ ॥ ૧૮૫॥

તતઃ સાયં પુનઃ પ્રીત્યા કૃત્વા વિશ્વેશ્વરાર્ચનમ્ ।
અન્નપૂર્ણાલયે પ્રીત્યા ચક્રે જાગરણં સુરાઃ ॥ ૧૮૬॥

વાચયન્ શઙ્કરસ્યૈવ કથાઃ શ્રાવ્યા મનોહરાઃ ।
ઉપવાસં ચકારાયં નિરાહારેણ સાદરમ્ ॥ ૧૮૭॥

તસ્યાં રાત્રૌ મહાનાસીત્સમ્મર્દઃ સુરસત્તમાઃ ।
પ્રદક્ષિણનમસ્કારાઃ સમ્મર્દેઽપિ કૃતા મુદા ॥ ૧૮૮॥

આવહન્તીતિ મન્ત્રેણ કૃતો હોમો મુનીશ્વરૈઃ ।
ક્ષીરેણાજ્યેન મધુના સર્વસમ્પત્પ્રવૃદ્ધિદઃ ॥ ૧૮૯॥

અનેનાપિ કૃતો હોમઃ ક્ષીરાજ્યાદિભિરાદરાત્ ।
આવહન્તીતિ મન્ત્રેણ સર્વસમ્પત્તિકામ્યયા ॥ ૧૯૦॥

તતઃ પ્રાતઃ સમુત્થાય વિશ્વેશાર્ચનપૂર્વકમ્ ।
અન્નપૂર્ણામપિ પ્રીત્યા પૂજયામાસ સાદરમ્ ॥ ૧૯૧॥

તતોઽયં ભોજયામાસ શૈવાઞ્છૈવસતીસ્તથા ।
સ્વયં ચ પારણાં ચક્રે શિવધ્યાનપુરઃસરમ્ ॥ ૧૯૨॥

ઈદૃશોઽયં પુરા કાશ્યાં સ્થિત્વાપિ તદનન્તરમ્ ।
ચૈત્રશુક્લાષ્ટમીં પ્રાપ્ય નાર્ચયામાસ શઙ્કરીમ્ ॥ ૧૯૩॥

દેવ્યેનં પ્રેરયામાસ ગન્તું દેશાન્તરં તતઃ ।
અથાયં વિપ્રવર્યોઽપિ નર્મદાં પ્રાપ્ય નિર્મલામ્ ॥ ૧૯૪॥

કૃતસ્નાનસ્તતો દિષ્ટ્યા સર્પદષ્ટો મૃતોઽભવત્ ।
તતોઽયં ભૂપતિર્જાતઃ સર્વભૂચક્રપાલકઃ ॥ ૧૯૫॥

સર્વસૌભગ્યસમ્પન્નઃ પુત્રપૌત્રસમન્વિતઃ ।
તતો મૃતોઽયં રાજેન્દ્રો વિમાનવરમાશ્રિતઃ ॥ ૧૯૬॥

ગીતઃ સ્તુતશ્ચ ગન્ધર્વૈર્મમ લોકમુપાગતઃ ।
મયાઽયં પૂજ્યતે ભક્ત્યા મત્સભાસદ્ભિરવ્યયમ્ ॥ ૧૯૭॥

સમ્પૂજ્યતે સુરા નિત્યં સાદરં ભક્તિપૂર્વકમ્ ।
કલ્પાષ્ટકમુષિત્વાત્ર તતો ભૂત્વાઽમરાધિપઃ ॥ ૧૯૮॥

કાશીં પ્રાપ્ય મુદા તત્ર દેહાત્યાગં કરિષ્યતિ ।
શિવયોઃ પૂજનં પૂર્વં કૃતમેતેન યત્નતઃ ॥ ૧૯૯॥

યતસ્તતઃ પુનઃ કાશીં સમ્પ્રાપ્યાયં શિવાજ્ઞયા ।
સર્વસંસારવિચ્છિત્યૈ કાશ્યાં સન્ત્યક્તજીવિતઃ ॥ ૨૦૦॥

મોક્ષ મહેશકૃપયા પ્રાપ્નોત્યેવ ન સંશયઃ ।
એતાદૃશૈર્દ્વિજવરૈઃ પુરા કાશીમુપાશ્રિતૈઃ ॥ ૨૦૧॥

મુક્તિઃ પ્રાપ્તા મહેશસ્ય કૃપયા સત્યમુચ્યતે ।
કલૌ તુ માનુષં જન્મ ભવત્યત્યન્તદુર્લભમ્ ॥ ૨૦૨॥

તત્ર ચેન્માનુષં જન્મ કર્તવ્ય શિવપૂજનમ્ ।
મનુષ્યેષ્વપિ ચેજ્જન્મ બ્રાહ્મણ્યં બ્રાહ્મણાદ્યદ્યદિ ॥ ૨૦૩॥

તદા ત્વવશ્યં કર્તવ્યં શ્રીશિવાભ્યર્ચનં મુદા ।
અત્યન્તદુર્લભં જન્મ કલૌ પ્રાપ્યાપિ માનુષમ્ ॥ ૨૦૪॥

યદિ નારાધ્યતે શમ્ભુસ્તસ્ય જન્મ નિરર્થકમ્ ।
શિવૈકશરણો ભૂત્વા કલૌ યદિ વસેન્નરઃ ॥ ૨૦૫॥

તસ્ય મોક્ષો ભવત્યેવ નાત્ર કાર્યા વિચારણા ।
યથા બિના સુવર્ણેન દુર્લભે હેમકુણ્ડલે ॥ ૨૦૬॥

તથા વિના મહાદેવપૂજાં મોક્ષોઽપિ દુર્લભઃ ।
યથા વિના ભોજનેન તૃપ્તિરત્યન્તદુર્લભા ॥ ૨૦૭॥

તથા વિના મહાદેવપૂજાં મોક્ષોઽપિ દુર્લભઃ ।
યથા ચક્ષુર્વિના જ્ઞાનં ચાક્ષુષં ત્વતિદુર્લભમ્ ॥ ૨૦૮॥

તથા વિના મહાદેવપૂજાં મોક્ષોઽપિ દુર્લભઃ ।
યથા વૃષ્ટિં વિના સસ્યવૃદ્ધિરત્યન્તદુર્લભા ॥ ૨૦૯॥

તથા વિના મહાદેવપૂજાં મોક્ષોઽપિ દુર્લભઃ ।
દેવત્વમેવ દેવાનાં મોક્ષસ્ય પ્રતિબન્ધકમ્ ॥ ૨૧૦॥

તતઃ કૃતાપિ સા પૂજા નાધુના મોક્ષદાયિની ।
કદા દેવત્વસમ્બન્ધનાશોઽસ્માકં ભવિષ્યતિ ॥ ૨૧૧॥

કદા દાસ્યતિ ગૌરીશો મોક્ષં વિશ્વેશપૂજયા ।
પુરા શઙ્કરમભ્યર્ચ્ય બ્રહ્મત્વં પ્રાર્થિતં મયા ॥ ૨૧૨॥

યદ્દત્તં શઙ્કરેણેદં કદૈતન્મે વિનઙ્ક્ષ્યતિ ।
પુરા શઙ્કરમભ્યર્ચ્ય વિષ્ણુનાપ્યતિ યત્નતઃ ॥ ૨૧૩॥

વિષ્ણુત્વં પ્રાર્થિતં તેન તત્પ્રાપ્તં શઙ્કરાજ્ઞયા ।
એવં શઙ્કરમભ્યર્ચ્ય દેવૈરન્યૈશ્ચ સાદરમ્ ॥ ૨૧૪॥

મહાદેવપ્રસાદેન તત્તત્પદમુપાર્જિતમ્ ।
ઇદાનીં માનુષં જન્મ વિષ્ણુઃ પ્રાર્થયતે સ્વયમ્ ॥ ૨૧૫॥

મયાઽપિ પ્રાર્થ્યતે નિત્યં તત્કદા વા ભવિષ્યતિ ।

ઇદાનીં વિષ્ણુરનિશં શિવપૂજાપરાયણઃ ॥ ૨૧૬॥

શિવપૂજાં તનોત્યેવ મુક્તિકામોઽતિયત્નતઃ ।
ભવદ્ભિશ્ચ મહાદેવઃ પૂજનીયઃ સુરાઃ સદા ॥ ૨૧૭॥

એવમારાધિતો દેવઃ કૃપાં કિં ન કરિષ્યતિ ।
ભવદાગમને હેતુર્જ્ઞાત એવ મયાઽધુના ॥ ૨૧૮॥

તત્તપો ભવતાં દુઃખં ન કરિષ્યતિ સર્વથા ।
યામોઽદ્ય વૈષ્ણવં ધામ વિષ્ણુઃ કિં વા કરિષ્યતિ ॥ ૨૧૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બ્રહ્માપ્રોક્તં કાશી વિશ્વેશ્વર શિવપૂજોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૫ । ૧૭૮-૨૧૯॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 15 . 178-219 ..

Notes:
While delivering the Upadeśa ઉપદેશ to Deva-s દેવાઃ, Brahmā બ્રહ્મા details to them about worshiping Śiva શિવ at Kāśī કાશી, especially at Viśveśvara Liñga વિશ્વેશ્વર લિઙ્ગ. He reiterates severally about the merits of residing, worshiping Śiva શિવ in various ways, and dying there; all this especially, with respect to attainment of Mukti મુક્તિ.

Encoded and proofread by Ruma Dewan

*Brahmaproktam Kashi Vishveshvara Shivapujopadesham*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*